Topics— जगन्नाथस्य स्थितिप्रकरण, पुरुषोत्तम माहात्म्य, क्षेत्र माहात्म्य, जगन्नाथस्य दर्शनफल, जगन्नाथस्य कीर्त्तनफल, जगन्नाथस्य निर्माल्यग्रहणफल ।

Authorities quoted—

ब्रह्म पुराण, पद्म पुराण, वृहद्विष्णु पुराण, शिवपुराण, ब्रह्मवैवर्त्त पुराण, बराह- पुराण, स्कन्द पुराण, पुरुषोत्तम माहात्म्य. कूर्म पुराण, गारुड पुराण, नरसिंह पुराण, बृहन्नारसिंह पुराण, विष्णुधर्मोत्तर पुराण, विष्णुयामल, ब्रह्मयामल, वायुपुराण, बृहद्- वामन पुराण, भागवतामृत, आग्नेय पुराण, ब्रह्माण्ड पुराण, भविष्य पुराण, वायु- पुराण. शिवधर्मोत्तर, प्रभास पुराण, लीलावती पुराण, मृत्युञ्जय पुराण, व्याससंहिता, वशिष्ठतन्त्र मोक्षोपायनपटल, बहवृच परिशिष्ट, वैरञ्चयतन्त्र, ब्रह्मरहस्य, मेरुतन्त्र,बृहद्- विष्णुपुराण, भागवतपुराण, विष्णुधर्मादिन पुराण, तत्त्वयामल, चतुर्वर्गयोगीश्वर।

Colophon— श्री वीरकेशरी देवङ्क ३८ अङ्क कुम्भ १५ दिन फाल्गुन कृष्ण रविवार अष्टमी ७ द ड ४८ लिना उत्तारु नवमीरे महेश्वर प्रहराजेण लिखितमिदं पुस्तकं।

135

यन्त्र चिन्तामणिः

Dh. 69(a)

By शिव

Substance—Palm leaf. No of folia 12 (13.2" × 1.5") Character— Oriya. Date of copy is not given. Condition not good. Incomplete, Find spot-Ranapur area, District-Puri.

इति शिवविरचिते यन्त्र चिन्तामणौ वेश्याधिकारः।

It contains twentyfour yantras on differnet subjects.

No colophon.

136

यात्राभागवतम्

Dh.103

By वालुङ्किपाठी

Substance— Palm leaf. No of folia 67. (14.6" × 1.3") Charater— Oriya, Date of copy is not given. Condition—worm eaten. Incomp- lete, Find spot—Balakhemindi, Dt. Ganjam

Beginning— श्री गणेशाय नमः, अविघ्नमस्तु

नारायणं प्रणवकल्पतरुं नमामि।

रासोल्लासभरेण नृत्यति महाकल्पद्रुमाधः सदा
नानाभूषण रत्नहारनिकरैरान्दोलितो वक्षसि।
लावण्यैक निकेतनं श्रुतिगुरुं वन्द्यं न्द्ररुद्रैः स्तुतं
वन्दे श्री व्रजसुन्दरी गणवृतं वृन्दावनेशं हरिम्॥

श्रीकृष्णलीलाज्ञानार्थं जनानामुपकारकम्
यात्रा भागवतं ना ग्रन्थं वक्ष्याम्यहं शुभम्॥

× ×

नीलाचल मुकुटमणेः श्री जगन्नाथ देवस्ययात्रादिकं सर्वं निरूपयितुं प्रमाणमारभते। यात्राणां मध्ये द्वादशयात्राणामेव मुख्यत्वम्।

द्वादशयात्रा यथा— दोलयात्रा, दमनकयात्रा, अक्षयतृतीया, स्नानयात्रा, श्रीगुण्डिचा देवशयन, अयनद्वय, पार्श्वपरिवर्त्तन, देवोत्थापन, प्रावरणषष्ठी, पुष्यपूर्णिमा यात्रा।

Topics— द्वादशयात्रा निरूपणं नाम प्रथमोऽध्यायः। दमनकयात्रा निरूपणं नाम द्वितीयोऽध्यायः। चन्दनयात्रा निरूपणं नाम तृतीयोऽध्यायः। देवस्नानयात्रा नाम चतुर्थोऽध्यायः। गुण्डिचायात्रा वर्णनं नाम पञ्चमोऽध्यायः। कर्कटसंक्रान्तियात्रा वर्णनं नाम षष्ठोऽध्यायः। मकरसन्क्रान्तियात्रा वर्णनं सप्तमोऽध्यायः etc.

End— इति श्रीमद् यात्राभागवते उपयात्रा निर्णये चतुर्विंशोऽध्यायः।
समाप्तोऽयं ग्रन्थः

No colophon.

157

Dh. 112. **याज्ञवल्क्य टीका**

By विज्ञानेश्वर

Substance— Palm leaf. No of folia 179 (16." × 1.5") Character— Oriya. Date of copy is not given, Condition - good. Complete, Find spot— Parlakhemndi Dist Ganjam.

Beginning— श्री गणेशाय नमः

पूर्वगृहस्थाश्रमिणां नित्यनैमित्तिक धर्मा उक्ताः। अभियुक्तादि गुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माश्च दर्शिताः। अधुना तदधिकार सङ्कोच-भूताशौच प्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते।

End— इति श्रीमत्पद्मनाभ भट्टोपाध्यायात्मज श्रीमत्परमहंस परिव्राजकाचार्य्य विज्ञानेश्वर भट्टारकस्य कृतौ ऋजुमिताक्षराणां याज्ञवल्क्यधर्मशास्त्रविवृतौ तृतीयोऽध्याय.सम।स।

No colophon.

138

Dh. 94.

याज्ञवल्क्य टीका

By विज्ञानेश्वर

Substance- Palm leaf No of folia 191 (17.5"×1.5") Character-Oriya, Date of copy is not given, Incomplete. Condition—good, Find spot—Khalikota. Dt. Ganjam, Orissa,

Same as in No 137. noted above, No colophon.

139

Dh 135(b)

रागात्र्म चन्द्रिका

By विश्वनाथ चक्रवर्त्ती

Substance—Palm leaf. No of folia 101 to 113 (12.1"×1.2") Character—Oriya. Date of copy is not given, Condition—good, Complete, Find spot-Parlakhemandi area, Dt. Ganjam, Orissa.

Beginning— श्री राधाकृष्णाभ्यां नमः

श्रीरूपवाक्सुधास्वादि चकोरेभ्यो नमोनमः।
येषां कृपालवैर्वक्ष्ये रागवर्त्मनि चन्द्रिकाम्॥

श्रीमन्‌भक्तिरसाम्भोधि बिन्दुर्य: पूर्वदर्शित:
तत्र रागानुगाभक्ति: संक्षिप्तात्र प्रतन्यते ॥

End— हन्त रागानुगावर्त्म दुर्दर्शं विबुधैरपि ।
परिचिन्वन्तु सुधिय उक्तं चन्द्रिकया मया ॥

इति श्रीमद्‌विश्वनाथ चक्रवर्तिकृतिरियं रागवर्त्मचन्द्रिका समाप्ता ।

No Colophon.

140

Dh.20(b) **राधाकृष्ण उपासना पद्धति:**

According to त्रैलोक्यमोहनतन्त्र and गोपालकल्प

Substance—palmleaf. No. of folia 50 to 145 (14.6"×1.4") Character Oriya, Date of copy is not given, Condition good Incomplete, Find-spot not known.

Beginning— श्री देव्युवाच—

देवदेव महादेव भक्तानुग्रहकारक
शक्तिमन्त्रास्तु बहुशः श्रुतास्त्वत्तो महाप्रभो ।
भुवनाधिपते मन्त्रो मन्त्रस्त्रैपुर सञ्जक: ।

× ×

इदानीं वैष्णवान्मन्त्रान् श्रोतुकामास्मि भो प्रभो ।

इति त्रैलोक्य मोहनाख्ये तन्त्रे गोपालकल्पे प्रथमपटलम् ।

No colophon.

141

Dd. 188. **रुद्रचाण्डी**

Substance – Palm leaf, No of folia 23 (7.5"×1.4") Character-

Oriya. Date of copy is not given, Condition good. Complete, Find spot- Lalita paṭapur, P.S. Khurda, Dt. Puri

End— इति श्री रुद्रयामले हरगौरीसम्वादे रुद्रचण्डी समाप्ता ।

No colophon.

142

Dh 189. **रुद्राभिषेकः**

Substance—Palm leaf, No of folia 42 (12.5"×1.2")·Character- Oriya. Date of copy is not given, Condition good. Incomplete, Find spot— Lalitapīṭapur, Dt. Puri.

No colophon.

It also contains नीलसरस्वतीमन्त्र, रुद्राध्यायव्याख्या, एकाम्रपुराणोक्त रथ प्रतिष्ठा, towards the end of the manuscript.

143

Dh. 30 **रुद्राभिषेक विधिः**

According to बौधायन तन्त्र

Substance— Palm leaf, No of folia 123. (7.3"+1.3") Character Oriya, Date of copy about 1873 A.D. Complete, Condition good, Find spot Bhubaneswar, Dt. Puri

No Colophon.

It contains some other subjects named बगलामुखी प्रयोगः, कालीकवचम् etc. towards the end of the manuscript.

144

Dh 190. **लिङ्ग पूजाविधिः**

Substance—Palm leaf, No of folia 61. (8.6"×1.3") Character—

Oriya, Date of copy is not given, Condition-worm-eaten. Complete. Find spot—Lalitapāṭapur. Dt. Puri.

No Colophon.

There is a subject named शरत्कालीन दुर्गापूजा towards the end of the manuscript.

145

Dh.17(a). **वाशिष्ठकल्पः**

Substance— Palm leaf, No. of folia 28 (16."×1.2")
Character Oriya, Condition worm eaten, Complete, Date of copy is not given, Find spot—not known.

Beginning — ॐ नमो योगीश्वराय

आश्रमस्थं सुखासीनं वशिष्ठं तपोभास्वरम् ।
ब्रह्मन् ...... समायुक्तं योगैश्वर्य समन्वितम् ॥
इति वशिष्ठकल्पे साधारणः प्रथमः पटलः

End— इति वशिष्ठकल्पे दशमः पटलः ।

No Colophon.

146

B.S.2. **व्रतकथा** (श्रीकृष्णजन्माष्टमी)

Substance—country made paper No. of folia 9 (7.5"×3.5".)
Character— Bengali, Date of copy is not given. Complete, Condition—fair, Find spot- Kujanga area, Dt. Cuttack

Beginning— ॐ नमः श्रीकृष्णाय
भविष्योत्तरे वशिष्ठं प्रति दिलीपत्राकथम्
End— इति भविष्यपुराणे श्रीकृष्णजन्माष्टमी व्रतकथा । श्रीरामचन्द्रः
No Colophon

147

Dh.150

व्रतकथा

Substance—Palm leaf, No of folia 78 (14.3"×1.5") Character—Oriya. Condition—good. Complete. Date of copy is not given Find-spot— Parlakhemundi, Dt. Ganjam

Topics— रामनवमी पूजाविधिः (Incomplete) कृष्णजन्माष्टमीविधिः, दधियात्राविधिः. भविष्योत्तरोक्त राधाजन्माष्टमी व्रतपूजा, नेत्रोत्सवविधिः, कात्यायनतन्त्रोक्त महोत्सव पद्धतिः, विजयदशमी विधिः, अपराजिताविधिः, गणेशव्रतकथा (according to स्कन्दपुराण) केदार व्रतकथा, सुदशा व्रतकथा (according to पद्मपुराण) वरलक्ष्मी व्रतकथा (according to भविष्योत्तर पुराण),स्कन्द पुराणोक्त सोमनाथ व्रतकथा, आरण्यक पर्वणि श्रीरामचरिते कौशल्यासीता सम्वादे सावित्री व्रतकथा, महादेव विवाहः, रामस्वामि विवाहः।

No colophon.

148

B.S. 17 (b).

व्रतकथा

Substance— Palm leaf. No of folia 12 (14.8"×1.3") Character—Oriya, Date of copy is not given, Condition— not good. Complete. Find spot—not kown.

Topics— दुर्गाष्टमीव्रतकथा, कुक्कुटीव्रत, विनायक व्रतकथा, बलभद्रपूजा।

No colophon.

149

Dh.151

व्रतकथा

Substance—Palm leaf. No of folia 138 (14.8"×1.3") Character—

Oriya, Condition good, Date of copy is not given, Complete, Find spot- Khallikota, Dt. Ganjam.

Topics— विनायक पूजाव्रतकथा, भविष्योत्तरे अनन्त व्रतकथा, लिङ्गपुराणे उमा-महेश्वरसम्वादे हरितालिका कथा, विष्णुपुराणोक्त जन्माष्टमी व्रतकथा, भविष्योत्तरे राधाष्टमी व्रतकथा, रामनवमी व्रतकथा, सावित्री व्रतकथा, पद्मपुराणोक्ता गुरुपञ्चमी व्रतकथा।

No colophon— ए अक्षर वाइकोलिमिभङ्कर।

150

Dh. 153

व्रतकथा

Substance— Palm leaf. No. of folia 120 (13.3"×1.3") Character Oriya, Condition good. Incomplete. Date of copy is not given. Find spot—Khallikota, Dt. Ganjam.

Topics— स्कन्दपुराणे सुदशाव्रतकथा, भविष्योत्तरे कृष्णयुधिष्ठिर सम्वादे अनन्त व्रतकथा, देवीपुराणे देवनारद सम्वादे दुर्गाष्टमी व्रतकथा, भविष्योत्तरे सोमनाथ व्रतकथा, स्कन्दपुराणे सोमनाथ व्रतकथा, विष्णुपुराणे जन्माष्टमी व्रतकथा।

No colophon.

There is a chapter named जनपद्शान्ति विधिः।

151

Dh. 142

विद्याकर पद्धतिः OR व्रत पद्धतिः

By विद्याकर वाजपेयी

Substance—Palm leaf, No. of folia 118, (14.7"×1.4") Character- Oriya, Date of copy is not given. Condition—not good, Incomplete, Find spot—Ranapur area, Dt. Puri.

Topics— विद्याकरकृता वृतपद्धतिः or विद्याकर कृता ऋग्‌वेद वृतपद्धतिः ।

End— इति विद्याकर पद्धतौ ऋग्‌वेद वृतविधिः ।

No colophon.

152

Dh. 80.

विवाह पद्‌धातिः

Substance—Palm leaf, No of folia 65 (12.5" × 1.2") Character—Oriya, Date of copy is not given, Condition—worm-eaten, Complete, Find-spot—Gaḍamāṇitrī, P.S. Begunia, Dt. Puri.

No colophon.

It also contains चन्द्रापनाविधिः, जातकर्म, सीमन्तोनयनं, नामकरणं, etc, towards the end of the manuscript.

153

Dh. 132

विवाह पद्‌धातिः

By दामोदर

Substance— Palm leaf, No of folia 127 (12.5" × 1") Character—Oriya, Date of copy is not given, Condtion—not good, Complete, Find-spot— Gadamāṇitrī P.S. Begunia, Dt. Puri.

Beginning— श्रीकृष्णाय नमः

वक्रतुण्डं नमस्कृत्य तथा पारस्करं मुनिम् ।
निषेकादि श्मशानान्तं कर्म दामोदरोऽतनोत् ।

End— इति चतुर्थीमन्त्रव्याख्या ।

No colophon.

154

Dh. 125.

विवाहकर्म

Substance— Palm leaf, No of folia 107 (14.7″ × 1.3″ Character-Oriya, Date of copy is not given, Condition -- good, Complete, Find spot— Dharadharapur area, Dt. Ganjam

No colophon.

155

Dh. 126

विवाहकर्म

Substance—Palm leaf, No of folia 127 (16.3″×1.3″) Character--Oriya, Date of copy is not given, Condition—good, Complete. Find spot- Dharadharapur area, Dt. Cuttack

No Colophon.

156

Dh. 95.

विभिन्न व्रत कथा

Sanskrit Text with Oriya translation

Substance—palm leaf, No. of folia 166 (13.5″×1.4″) Character—Oriya, Date of copy is not given, Condition— good Incomplete, Find-spot- Ranapur area, Dt. Puri

Topics— सावित्री व्रतकथा, सत्यनारायण व्रतकथा, कालिकापुराणोक्ता शुक्ला नवमी व्रतकथा । दूर्वाष्टमी व्रतकथा । उमामहेश्वर व्रतकथा (It is celebrated on भाद्रपूर्णिमा) वरलक्ष्मी व्रतकथा, गुरुपञ्चमी व्रतकथा, (Oriya) कालमाधवीये

जन्माष्टमी व्रतकथा, भविष्योत्तरे सत्यनारायण व्रतकथा, विनायक व्रतकथा, देवीपुराणे मङ्गलसंक्रान्ति व्रतकथा, विष्णुधर्मोत्तरे सावित्री व्रतकथा, अनन्त व्रतकथा। (Oriya)

No colophon.

157

Dh 62. **पूजाविधिः**

Substance— Palm leaf, No of folia 114 (15 5″×1.2″) Character—Oriya, Date of copy is not given, Condition— bad, worm eaten and some on folia are broken, Incomplete. Find spot—Baripada Museum Dt. Mayurabhanja, Orissa

Topics— विष्णुपुराणोक्त श्री गोपाल पूजाविधिः, शालग्राम पूजाविधिः, पञ्च-पूजाविधिः, संक्षिप्तशिव पूजाविधिः, संक्षिप्त गणपति पूजाविधिः, आसनशुद्धिः। (Incomplete)

No colophon.

158

Dh 61. **विभिन्न व्रत प्रकरणम्**

Substance— Palm leaf. No of folia 88 (16.″×1.3″) Character—Oriya. Date of copy is not given, Condition-not so good. Complete, Find spot— Baripda Museum Dt. Mayurabhanja, Orissa

Topics— वैशाखमासकृत्य, ज्येष्ठ शुक्लतृतीयायां रम्भाव्रत, ज्येष्ठशुक्ला निर्ज्जला एकादशी, रथयात्रा, श्रावणशुक्लैकादश्यां दधिव्रत, भाद्रमासकृत्य, भविष्यपुराणे हरितालिकाव्रत, भाद्रशुक्ल चतुर्थ्यां वरदचतुर्थीव्रत, गणनाथव्रत, नीलाद्रिपतेः पार्श्वपरिवर्त्तन विधिः, अनन्तव्रत, जिताष्टमी, उष सप्तमी, दुर्गोत्सवविधि, नवरात्रि, कुमारीपूजाविधि, महाष्टमी व्रतप्रकरण, अपराजिता दशमी, कार्त्तिकमासकृत्य, मार्गशीर्षमास कृत्य, प्रथमाष्टमी, पौषमासकृत्य, माघस्नान, माघसप्तमी, माघशुक्लाष्टमी भीष्माष्टमी वा, रटन्ती चतु-

दशी, फाल्गुन कृष्णाएकादशी, शिवरात्रि, चैत्रमासकृत्य, रामनवमी. स्नानोत्सव निर्णय-विधि, चन्दनयात्राविधि, वनयागविधि, द्वादशयात्रा विधि, वञ्जुलीवृत etc.

No colophon.

159

P. 64. **विभूतियोग:** and **मधुसूदनमन्त्र विधि:**

Substance— Palm leaf, No of folia 85 (8.5"×1.5") Character-Oriya, Date of copy is not given, Condition- very bad, worm eaten Complete, Find spot- Baripada Museum, Dt. Mayurabhanja, Orissa

No colophon.

160

P-. 24 **विरजा माहात्म्यम्**

Substance— Palm leaf. No of folia 189. (12.6"×1.4") Charecter—Oriya, Date of copy is not given. Condition—not good. Complete, Find spot—Puri town, Dt. Puri

Beginning— श्री गणेशाय नमः श्री विरजसे नमः

हिमाद्रे रुत्तरे भागे दिव्योद्याने महावने
माणिक्यमण्डपे रम्ये दिव्यगन्धसमन्विते ॥

End— इति श्री ब्रह्माण्डपुराणोत्तरखण्डे विरजामाहात्म्ये विमुक्तेश्वर महिम-कथनं नाम एकोद्विंशोऽध्यायः। विरजाक्षेत्रमाहात्म्यं समासम्।

No colophon

161

Dh. 17(c) **विश्वामित्रकल्प:**

Substence— Palm leaf, No of folia 15 (15.7"×1.5") Character

Oriya, Date of copy is not given, Condition—not good, Complete. Find-spot-not known.

Topics— विश्वामित्रकल्पे सावित्री कल्पे साधारणः प्रथमपटलः । विश्वामित्र प्रोक्ते प्रयोगविधि र्नाम द्वितीय पटलः । + × × शत्रु निग्रहो नाम षष्ठःपटलः । विश्वामित्र प्रोक्ता सर्वलोमगायत्री गायत्रीमुद्रा समाप्ता । विश्वामित्रप्रोक्ता सहस्रनाम कल्पः । नामत्रय कल्पः ।

No Colophon

162

Dh. 19

विष्णुभक्ति चन्द्रोदयः

By नृसिंहारण्य महामुनि

Substance—Palm leaf. No of folia 142 (17.3"×1.5") Character—Devanagari, Date of copy is not given. Condition worm eaten Complete, Find spot-Cuttack, Orissa

Beginning— श्री परमात्मने नमः

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।

ॐ नमोभगवते श्री मङ्गलेश्वर श्रीमद्दिव्यलक्ष्मीनृसिंहाय ।

वन्दे श्रीमन्नृसिंहेशं पुण्यारण्यं गुरूत्तमम् ।
श्रीरामममन्त्रराजञ्च वैष्णवान् हार्दसिद्धये ॥

आविर्बभूव लोकेऽस्मिन् सद्भक्त्याह्लाददायकः ।
श्रीविष्णुभक्तिचन्द्रोयं विष्णुप्रेमाब्धिवर्द्धनः ॥

× × ×

स्मृत्वा प्रणम्य चादौ गुरुं श्रीविष्णुभक्ति चन्द्रोदयम् ।

End— श्री विष्णुभक्ति चन्द्रोदयः सट्षोडश कलायुतः
सेव्यतां सेव्यतां सम्यक् भगवद्भक्ति वर्द्धनः ।

× × ×

नृसिंहारण्य इति ख्यातो विष्णुधर्म प्रकाशकः
विचार्य्य विष्णुशास्त्राणि चक्रे ग्रन्थं महामुनिः ।

इति श्री नृसिंहारण्य महामुनि विरचिते श्री विष्णुभक्ति चन्द्रोदये षोडशकला-प्रकरणम् ।

No Colophon.

163

Dh 127

वृषोत्सर्ग विधिः

By दक्ष

Substance—Palm leaf. No of folia 41 (15″×1.5″), Character—Oriya, Date of copy is not given, Condition— good, Incomplete (up to अनड्वाह दान) Find-spot—Dharadharapur area, Dt. Cuttack.

Beginning— श्री गणेशाय नमः

अथ दक्षोक्त वृषोत्सर्ग विधिः ।

एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः ।
अपि प्रेतत्वमाप्नोति दत्तैः श्राद्ध शतैरपि ॥

No colophon.

There are 80 folia towards the end of the manuscript containing 15 chapters of Kāṇvasaṃhitā.

164

Dh.191.

शतरुद्र. विनायक कल्पादयश्च

Substance – Palm leaf. No of folia 20 (15.″×1.5″) Character—

Oriya, Date of copy is not given, Condition good, Complete, Find-sopt Sākhigopal, Dt. Puri.

No colophon.

It contains some other subjects named एकाक्षरकोष:, लिङ्गपुराणोक्त-तिज़्व्रतकथा, सङ्कटनारिणी स्तोत्र', आदित्यपुराणोक्त उद्यापनविधि, विष्णुसहस्रनाम-शापोद्धार विधि: । etc towards the end of the manuscript.

165

T. 13. **शारदाशरदार्च्चन पद्धति:**

By गोदावर मिश्र

Substance--Palm leaf, No of folia 83 (13.5"×1.3") Character-Oriya, Date of copy is not given, Condition—good, Complete. Find spot—Bhubaneshwar, Dt. Puri

Beginning— श्री दुर्गायै नम:

गुरु' गणपतिं नत्वा संहिताद्युक्तसत्क्रमात्
क्रियते शारदायाश्च शरदर्च्चन पद्धति: ।
देवालिमौलिनीलाश्म रश्मिभृङ्गकुलाकुले
देवि त्वच्चरणाम्भोजे रमतां मामकं मन: ॥

राजकौत्ससवंशभूषणमणिं नानागुणिग्रामणीं
कुज्ञानार्णव तारणैकतरणिं शिष्यौघ चिन्तामणिम् ।
सद्विद्या वितरणि सुबोधसरणिं विप्राग्रणीं नौम्यहं
तातं श्री बलभद्रसञ्ज्ञममलां तामण्णपूर्णां प्रसूम् ॥

End— नाना पुराण वचनानि मिथो विरुद्धा-
न्यानीय तानि गुणमुख्यतया विचार्य्य ।
निर्माय शिष्टमत संस्कृतपद्धतिं तु
गोदावरोऽर्पयति पादतले शिवाया: ॥

इति श्री गोदावर महापात्र विरचिता दुर्गाशरदुत्सव पूजाक्रम संस्कृत पद्धति: समाप्ता ।

Authorities quoted—

ईशानसंहिता, भविष्योत्तरं, दुर्गाकल्प, कालिकापुराणं, गृह्यसूत्रं, शाश्वतसंहिता, दुर्गोत्सवः ।

No colophon.

N. B:- Śrāddha paddhati is written on folia 84 to 115 and कुष्माण्डदानविधिः is written on folia 116 and 117.

166

T. 27

शारदाशरदर्च्चन पद्धतिः

By गोदावर मिश्र

Substance—Palm leaf, No of folia 81 (15.9"×1.?") Character—Oriya, Date of copy is not given, Condition— wormeaten on both the sides, Incomplete, Find spot-Ranapur area, Dt. Puri

This manuscript does not contain the first verse of the मङ्गलाचरणम् as found in T. 13 noted above.

No colophon.

167

Dh. 29

श्राद्धविधिः

Substance— Palm leaf, No. of folia 102 (8.8"×1.6") Character Oriya, Date of copy is not given, Condition good Complete, Find spot—Kodala Athagarah, Dt. Ganjam.

No Colophon.

168

Dn. 192 (a)

श्राद्धकल्पसूत्रम्

According to कात्यायन

Substance—Palm leaf, No. of folia 35 (14."×1.1".) Character--

Oriya, Date of copy is not given, but the old scripts. are very old Condition-bad, both the sides worm eaten, Incomplete, Find spot-Bhubaneswar, Dt. Puri.

Topics— पार्वण श्राद्धपद्धतिः By मिश्रुमिश्र, जलपूजा विधिः, श्रौताधान पद्धतिः ।

No colophon.

169

Dh 41(a)

श्राद्धदीपः

By दिव्यसिंह महापात्र

Substance—Palm leaf, No of folia 45, (14.-"×1.5") Character-Oriya. Date of copy is not given, Condition good. Incomplete, Find spot— Ranapur, area Dt. Puri.

Beginning— श्री गणेशाय नमः

प्रणम्य देवं श्रीकृष्णं भवानीशङ्करावपि ।
तन्यते श्राद्धदीपोऽयं दिव्यसिंहेन धीमता ॥

End—इति श्री दिव्यसिंह महापात्रेण विरचितः श्राद्धदीपः समाप्तः ।

वत्सगोत्रे समुत्पन्नो दिव्यसिंहाभिधः सुधीः
श्राद्धदीपाभिधं ग्रन्थं चकार विदुषां मुदे ॥
पुरारिप्रिया पार्वती शं करोतु ।

Topics — श्राद्धविचारः, क्रियाकर्तृ विचारः, अष्टकादिश्राद्धम्, सपिण्डीकरण श्राद्धम, साम्वत्सरिकश्राद्ध निर्णयः etc.

Authorities quoted—

आदित्यपुराण, आपस्तम्भ, कालादर्शकार, कात्यायन, गोभिल, गौडा, गौतम, छन्दोगपरिशिष्ट. तन्त्ररत्न, देवल, नारायण, बृहस्पति, पैठीनसी, रुचिधर, मुकुन्ददीक्षित, मरीचि, मञ्जरीकार, मात्स्य, माधवाचार्य, लक्ष्मीधर, लघुहारीत, व्यासः, विष्णुधर्मोत्तर, विज्ञानेश्वर, विष्णुपुराण, विष्णु, विप्रमिश्र , शङ्ख, शुद्धिचन्द्रिकाकार, शूलपाणि, वशिष्ठ,

वराहपुराण, विवेक.विद्याकर वाजपेयी, वायुपुराण, विश्वनाथमिश्र, स्कन्दपुराण, सुमन्तु, स्मृतिरत्नमाला, सिंहवाजपेयी, हारीतभाष्यकार ।

No colophon.

170

Dh. 9.(a)

श्राद्धदीपः

दिव्यसिंह महापात्र

Substance— Palm leaf, No of folia 57. (16."×1.5") Character Oriya, Date of copy is not given, Condition bad, some folia are broken. Complete, Find spot Gada mānitri,Dt. Puri

Similar to No 169. No Colophon.

It contains some व्रतकथा named सुदशाव्रतकथा, रविनारायण व्रतकथा at the beginning of the manuscript.

171

B. S. 3

श्राद्धपद्धतिः OR सपिण्डीकरण श्राद्धम्

Substance— Palm leaf, No of folia 59 (9.2"×3.3") Character- Bengali. Date of copy is not given, Condition good. Complete, Find spot- Kujanga area, Dt. Cuttack

No colophon.

172

Dh.20(b)

श्राद्ध पद्धतिः

Substance—palm leaf. No. of folia 65 (13.2"×1.2")

Character Oriya, Date of copy is not given. Condition not so good Incomplete, Find-spot Balangir patna, Dt. Balangir.

No colophon.

173

Dh 158. **शादध पदधातिः**

Substance—Palm leaf, No of folia 99. (10."×1.2") Character—Oriya, Date of copy is 45 th Aṅka of Rāmachandra Deva III or 1854 A.D. Complete.Condition-good. Find spot Dharaḍharapur-area. Dt. Cuttack

No Colophon—समस्त रामचन्द्रदेवङ्क ४५ अङ्क कन्यमास ९ दिन आश्विन्य कृष्ण पञ्चमी वृहस्पति वासरे वेलप्रहरक समयरे ए पोस्तेक सम्पूर्ण।

Post colophon - ए पोस्तक तिहिडाशासन रामचन्द्र पाणिगाहीङ्कर। ए पोस्तक लेखनकार वाइ पाणिग्राहीङ्क नाति भोचन्नि पाणिग्राहीङ्कर । श्री लक्ष्मीनृसिंह रक्षा करिवे भोवनिकि।

170

Dh.152. **शिव पूजाविधिः or शैव चिन्तामणिः**

Substance—Palm leaf. No. of folia 179. (11.1"+1.5") Character Oriya, Date of copy is not given. Condition good, Incomplete. Find spot—Bhubaneswar, Dt. Puri.

Beginning— ॐ नमः शिवाय

अथ शिवपूजाविधि लिख्यते ।

प्रणम्यादौ महादेवं हिमवत्तनया पतिम् ।
शैवचिन्तामणि ग्रन्थो वक्ष्यते मुक्तये नृणाम् ।

देवं नत्वा करिवरमुखं सर्वविघ्नापहारं
सर्वेशानं त्रिनयनमथो चन्द्रखण्डाङ्कितं हि ।
वक्ष्ये शैवागम जलनिधिप्लावमीशानतत्त्वं
प्रादुर्भावं वृजिनकलहं शैवचिन्तामणिं च ॥

End— आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाकर्म न जानामि क्षमस्व परमेश्वर ॥
इति शिवपूजाविधिः ।

No colophon.

175

Dh. 22

शुद्धिचान्द्रिका

By कालिदास चयनी

Substance—Palm leaf, No. of folia 12, (12.8"×1.5"). Character- Oriya, Date of copy is not given. Condition—not good, Incomplete, Find spot— Puri. Orissa.

Beginning— मन्वादिशास्त्रमतसंचयालयः
श्रीकालिदासाभिधधीर चन्द्रमाः ।
तेने सुधाविन्दु विवृद्ध्य शोचक
ध्वान्तान्धलोके-क्षणशुद्धिचन्द्रिकाम् ॥

No colophon.

176

Dh. 48.

शुद्धिचान्द्रिकाटीका

By शान्ति रथ

Substance—Palm leaf, No of folia 10to17 (1st to 9th lost)

(13.9"×1.3") Character- Oriya, Date of copy is 24th Aṅka year of Rāmachandra Deva of Orissa, or 1837 A.D. Incomplete, Condtion good, Find-spot—Gaḍamāṇitrī, P.S. Begunia, Dt. Puri.

End— कालिदासेन पूर्वार्थां निर्मिता शुद्धिचन्द्रिका
व्यक्तार्थां हि हितार्थं च कृता शान्तिरथेन या ।।

या कालिदासेन कृता महत्तरा
मता बुधानां किल शुद्धि चन्द्रिका ।
सा साम्प्रतं शान्तिरथेन निर्मिता
नृणां हिताय स्फुट शुद्धिचन्द्रिका ॥

इति शान्तिरथ कृतौ शुद्धिचन्द्रिकाटीका समाप्ता ।

Colophon— श्रारामचन्द्र नृपतेः कुलपद्मसूर्य्य-
स्याङ्के चतुर्विंशदङ्के परिपूर्णभावम् ।
प्राप्ता सुधीषण दिने सुकुहूतिथौ च
श्री शुद्धिपूर्वकथिता खलु चन्द्रिकेयम् ॥

177

Dh. 68

शुद्धिचान्द्रिका

of कालिदास चयनी with टीका By विद्यावागीश

Substance— Palm leaf, No of folia 33 (8.5"×1.2") Character—Oriya, Date of copy is the reign of Vira Keśari Deva who ruled Orissa on 1736—1793 A.D. Complete, Condition—worm-eaten, Find spot— Ranapur area, Dt. Puri.

No colophon.
इति श्री कालिदासकृता शुद्धिचन्द्रिका समाप्ता ।

विद्यावगीश लिखिता सम्पूर्णा शुद्धिचन्द्रिका
प्रीतये लिङ्गराजस्य सर्वदैकाम्रवासिनः ॥
श्री वीरकेशरि नृपस्य

178

B.S. 20

शुद्धितत्त्वम्

With short notes, by रघुनन्दन भट्टाचार्य्य, son of
हरिहर भट्टाचार्य्य

Substance—Palm leaf, No of folia 168 (13.5"×3.1") Character—Bengali, Condition—good. Complete, Date of copy is not given Find-spot— Kujanga area, Dt. Cuttack, Orissa

Beginning— ॐ नमो ×××

प्रणम्य सच्चिदानन्दं जगतामीश्वरं हरिम्
शुद्धितत्त्वानि तत्प्रीत्यै वक्ति श्रीरघुनन्दनः ॥

End— इति वन्द्यघटीय श्री हरिहर भट्टाचार्य्यात्मज श्री रघुनन्दन भट्टाचार्य विरचिते स्मृतितत्त्वे शुद्धितत्त्वं समाप्तम् । श्री कृष्णायनमः ।

The contents of the work are given at the beginning of the manuscript.

179

Dh. 39

शुद्धिदीपिका

By महोत्तापनीय श्रीनिवास, with a tika named
शुद्धिदीपिका विवरणम्, by गोविन्दानन्द कविकङ्कणाचार्य्य

Substance— Palm leaf. No of folia 152 (16."×1.5") Character—Oriya, Date of copy is not given, Complete. Condition— not good. Find spot—Bhubaneswar. Dt. Puri

Beginning— श्री गणेशाय नमः

जगतिख्यात गुणौघो हरिरवतीर्णोऽंशतः पृथिव्याम्
श्रीमद्गणपतिभट्टो ज्योतिर्विद्यासु मार्त्तण्डः ।

कविकङ्कण पण्डितः प्रीत्यासहितस्तस्य सुतोऽर्थ कौमुदीम् ।
तनुते किल शुद्धिदीपिका खिलतत्त्वार्थ विवेचनाविधिन् ॥

End— सुविस्तरे ज्योतिषि यत्नतोद्धृ ां
समस्तकर्म व्यवहार दर्शिकाम ।
श्री श्रीनिवासेन समीक्षितामिमां
हे मत्सराः पश्यथ शुद्धि ीपिकाम् ॥

इति श्री महत्तात्तनीय पण्डित श्री श्रीनिवास विरचितायां शुद्धि ीपिकायां यात्रानिर्णयो नामाष्टमोऽध्यायः ।

इति श्री गोविन्दानन्द कविकङ्कणाचार्य्य कृतायां शुद्धिदीपिकायां टीकाविवरणं समाप्तम् समाप्तोऽयं ग्रन्थः ।

No colophon.

180

Dh. 58. **शुद्धि दीपिका**

By श्रीनिवास, with Oriya prose translation.

Substance—palm-leaf, No. of folia 108 (16.2"×1.3") Character—Oriya, Date of copy is the time of Jadunathe Bhanja of Mayurabhanja, in 1852 or 1853 A.D. Complete, Condition—not good, worm-eaten. Find-spot- Baripada Museum, Dt. Mayurabhanja. Orissa.

Beginning— श्री गणेशाय नमः, श्री सूर्य्याय नमः ।

तृष्णातरङ्ग दुस्तर संसाराम्बोधि लंघने तरणिः ।
उदयवसुधाधरारुणमुकुटमणि पातु व स्तरणिः ॥

Oriya tran-letion—

तरणि ये सूर्य्य से तुम्भमानङ्क रक्षा करन्तु । ग्रन्थ आद्य मङ्गलनिमित्ते कल्याण कहिला। सूर्य्य केमन्त,उदयपर्वतर, अरुणवर्ण, मुकुटमणि अटइ। तरणि वोलि सूर्य्यङ्कु कहि। नौका-कहि। पुणि से सूर्य्य केमन्त, तृष्णा ये आशा से तरङ्ग हेला, तेणु करि दुस्तर होइ संसार ये समुद्र तहिंकि तरणि होइले।

End— मु' ये श्रीनिवासाचार्य्य, विस्तार ज्योतिषरत्नरु व्यवहार दीपिका कलि। पर भलकु द्वेष न करिव।

इति श्री महीतापनीय पण्डित श्रीनिवास विरचितायां यात्रानिर्णयो नामाष्टमोऽध्यायः।

Colophon.— सालस्यपष्ठ नृप यदुनाथं
... ... जिवे पञ्च समाप्तौ ग्रन्थः।
वाइनदेव शर्मणः। खुण्टापुरी ग्रामवस्थित ए पुस्तक रामर

181

Dh. 13?.

शुद्धिदीपिका

By श्रीनिवास, with अर्थ कौमुदी टीका,
By कविकङ्कण गोविन्दानन्द

Substance—Palm leaf, No of folia 58 (16.1″×1.5″) Character--Oriya, Date of copy is not given, Condition—good, Complete. Find spot- Dharadharapur area, Dt. Cuttack.

No colophon. Same as in No 179

182

Dh. 193

शुद्धिदीपिका

By श्रीनिवास

Substance— Palm leaf, No of folia 93 (15.1″×1.1″) Character-Oriya, Date of copy is not given, Condition - not good, worm-eaten on both the sides. Complete, Find spot— Bhubaneswar, Dt. Puri

No Colophon. Same as in No 174

There are some folia, containning Vaidya Sātra, towards the end of the manuscript.

183

Dh.194.

शुद्धिदीपिका

By श्रीनिवास

Substance—Palm leaf. No. of folia 58 (12.1" × 1.3") Character—Oriya, Date of copy is not given. Condition good, Complete, Find-spot- Dharadharapur area, Dt. Cuttack.

No colophon Same as in No 179

There is another subject named केरलदशा towards the end of the manuscript.

184

Dh.91(c)

शूल्बभाष्यम्

Substance— Palm leaf. No of folia 55. (16." × 1.3") Charecter—Oriya, Date of copy is not given. Condition—not good. Complete, Find spot—Ranapur area, Dt. Puri.

Beginning— श्री गणेशाय नम:

रज्जुत्रिगुणयाक्षेत्रा क्षत्राणि संक्षिपत् यजः ।
यस्तं विश्वसृजं नत्वा शुल्वभाष्यं समारभे ॥

No colophon.

185

Dh. 86.

शूद्राह्निकपद्धतिः

By गोपीनाथ पट्टनायक

Substence— Palm leaf, No of folia 52 (12.7" × 1.1") Character Oriya, Date of copy is not given, Condition—not good, Complete. Find spot-Gadamānitrī. Dt Puri

Beginning— श्री रुद्रशरणम्

तितिक्षुणा निस्पृह मानसेन वर्णाश्रमाचार समुद्यतेन ।
यः प्राप्यते शुद्धतरेण पुंसा नारायणं तं सततं स्मरामि ।

श्री दामोदर पट्टनायक सुतोऽनल्पै गुणैरन्वितो
विख्यातो भरतो व्यराजत सदा सम्भावितो भूभुजा ।
तस्य श्रीपति-पाद चिन्तनरतस्याज्ञाविशेषावृतो
गोपीनाथ कृती तनोति विशदां शूद्राह्निकीं पद्धतिम् ॥

End— इति शूद्राह्निक पद्धतिः समाप्ता ।

No colophon.

186

Dh. 33. शैव कल्पद्रूमः

By लक्षधर मिश्र

Substance—Palm leaf. No of folia 149 (15.3″×1.1″) Character—Oriya, Date of copy is 38th Aṅka of Vīrakeśari Deva I or 1766 A.D. Complete, Condition— good, Find-spot—Bhubaneswar, Dt. Puri

Beginning— श्री गणेशाय नमः

एकदन्तमुमापुत्रं गजवक्त्रं त्रिलोचनम् ।
चन्द्रार्द्धधारिणं वन्दे सर्वविघ्नोपशान्तये ॥

× × ×

श्रुतिस्मृतिपुराणानां भारतागमधर्मिणाम्
भूयात्सुधाक्यबीजाच्च शैवकल्पद्रुमोदयः ॥

End— एकाम्रे भुवनेश्वरप्रियकरे चक्रेऽध्वरं यः पुरा
शाण्डाल्यास्य मुकुन्दशरणपति कौत्साऽन्वयःदर्याम्बुः ॥

प्रद्य म्नाह्वय एष शङ्करतनुः साक्षादिति प्राग्रहीन्-
पादौ यस्य विलोक्य भालनयनः श्रीमन्नृसिंहो नृपः।
तत्पुत्रो मधुसूदनाग्रज उदगूजोऽग्नि होत्री शिव-
ध्यानानन्दविकाशिहृत्सरसिजः श्री रामकृष्णभिधः।
तस्याभूत् तनयोऽम्बिकापतिमति लक्ष्मीधरो मन्दधी-
स्तेनायं रचितः सतां सुखकरः श्रीशैवकल्पद्रुमः ॥

इति श्रीमदेकाम्र विपिन-विदित स्वर्णकूटाचल-शिखरि कन्दरोदर विनोदि शम्भुवर-त्रिभुवनेश्वरपदद्वन्द्वारविन्दमकरन्दपाननिर्भरमत्तमधुकर श्रीलक्ष्मीधरमिश्र विरचिते श्रीशैव-कल्पद्रुमेऽष्टमः काण्डः।

समाप्तोऽयं ग्रन्थः।

Colophon — भूपतेरष्टवि शाब्दे वीरकेशरिणो मधौ।
योगेश्वरेण लिखितः शैवकल्पद्रुमोदयः ॥
श्री शिवार्पणमस्तु।

187

Dh. 195

शैवकल्पद्रुमः

By लक्ष्मीधर मिश्र

Substance—Palm leaf. No.of folia 44 (15.1" × 1.3") Character—Oriya, Date of copy is not given. Condition good, Incmplete, Find spot-Ranapur area, Dt. Puri

No colophon. Same as in No 186

188

P. 40(a).

शैवकल्पद्रुमः

By लक्ष्मीधर मिश्र

Substance — Palm leaf, No of folia 183 (14." × 1.") Character-

Oriya, Date of copy is 14th Aṅka year of Divyasiṃha Deva III or 1866/1867 A.D. Condition-good, Incomplete, Find spot- Ranapur area, Dt. Puri

Same as in No 186

Colophon— दिव्यसिंहस्य चतुर्दशाङ्के पुस्तकं लिख्यते ।

189

Dh.70 **शैवार्च्चन चान्द्रिका**

Substance— Palm leaf, No of folia 50 (12″×1.3″) Character— Oriya, Date of copy is not given, Condition—not good, Incomplete. Find spot—Ranapur area, Dt. Puri

Beginning— श्री गणेशाय नमः

गजाननं शारदचन्द्रमौलिं
त्रिलोचन भोगि कलापभूषम ।
श्यामाङ्ग ह्रस्वोदरचारुमूर्त्तिं
ग्रन्थस्य हेतुं प्रणमामि शैवम् ।

× × ×

नाति विस्तरं धृतं मनोज्ञं
वक्ष्यामि शैवार्च्चन चन्द्रिकाख्यम् ।

No colophon.

190

Dh. 37. **शैवचिन्तामणिः**

Substance— Palm leaf. No of folia 101 (11.5″ × 1.3″) Character—

Oriya, Date of copy is not given, Condition—good, Complete, Find-sopt Ranapur area, Dt. Puri.

Beginning— ॐ नमः शिवाय ।

प्रणम्यादौ महादेवं हिमवत्तनया पतिम्
शैवचिन्तामणि ग्रन्थो वक्ष्यते मुक्तये नृणाम् ॥

End— कृत्वैवं शिवशास्त्रसंशयभिद श्री शैवचिन्तामणिं
शम्भोः पादसंरोरुहेऽम्बुजभवाद्यैः सेविते ह्यर्पितः ।
शास्तामे शिवभक्तिरेव हृदये पुण्या सदा निश्चला
यां कृत्वामरसिद्धमानवपरा प्रापुः पदं शाङ्करम् ॥

इति श्री शैवचिन्तामणौ दर्शनादि शिवरात्रि व्रतकथनं नामाष्टमः पटलः ।

No colophon. समाप्तोऽयं ग्रन्थः

191

Dh. 131. **शैवचिन्तामणिः**

Substance— Palm leaf, No. of folia 93 (14.8″×1.3″) Character—Oriva, Date of copy is not given, Condition—good Complete, Find spot—Dharadharapur area, Dt. Cuttack.

No colophon.

श्रीमहेश्वर रक्षा करिबे प्रभाकरकु, Same as in No 190

192

Dh 196 **शैवचिंतामणिः**

Substance—Palm leaf, No. of folia 91 (13.5″×1.2″) Character-- Oriya, Date of copy is not given, Condition-good, Incomplete, Find spot- Ranapur area, Dt. Puri.

No colophon Same as in No 190

193

Dh. 197 **शैवचिंतामणि:**

Substance—Palm leaf. No of folia 63 (13 8"×1.2") Character—Oriya, Date of copy is not given, Condition— good, Complete, Find spot-Gada Mānitiri, Dt. Puri.

No colophon. Same as in No 190

194

Dh 56. **शैवाचिंतामणि:**

Substance—Palm leaf, No of folia 51, (13.8"×1.2") Character-Oriya. Date of copy is not given, Condition good. Incomplete, Find spot— Ranapur area, Dt. Puri.

Same as in No 190. No colophon.

195

Dh. 78. **शैव पद्धतिः**

By मागुणि मिश्र

Substance—palm leaf. No. of folia 75 (14.7"×1.2") Character Oriya, Date of copy is not given, Condition—good, Complete. Find spot—Balangir town, Dt. Balangirpatana, Orissa.

Beginning— श्री हरये नमः।

शिवांघ्रिस्मृति सं शुद्धि चेतसा गुरुसेविना
कृतिनेयं मागुणिना लिखिता शैवपद्धतिः।

End— इति श्री हयशीर्ष पञ्चरात्रोक्तपण्डितमागुणिविरचित लिङ्गस्थितप्रासाद-प्रतिष्ठा समाप्ता। No colophon.

196

Dh. 113. **शैवप्रतिष्ठा सार:**

Substance- Palm leaf, No of folia 121 (15."×1.3") Character-Oriya, Date of copy is not given. Condition worm-eaten, Incomplete, Find-spot Bhubaneswar, Dt. Puri.

Topics— आसनशुद्धि, भूतशुद्धि, अर्घ्यविधि, मङ्गलांकुरारोपण विधि, नवशक्तिपूजा, लिङ्गपाद प्रतिष्ठाविधि: etc.

No colophon.

197

Dh 161. **शौचाचार:**

Substance—Palm leaf, No of folia 112. (16.6"×1.4") Character—Oriya, Date of copy is not given. Condition-good. Complete. Find-spot-Dharadharapur area. Dt. Cuttack

Beginning—श्री गणेशाय नम:, श्री सरस्वत्यै नम:, नमो भगवते वासुदेवाय ।

अथातो हिमवदग्रे देवदारु महावने
व्यासमेकाग्रमासीनं पप्रच्छु ऋषय: पुरा ।
मनुष्याणां हितं धर्मं वर्त्तमाने कलौ युगे
शौचाचारं यथावृत्तं वद सत्यवतीसुत ।

No colophon –

198

Dh.216 **सदाचार विवेक:**

By वाणीदास बडपण्डा महापात्र

Substance – Palm leaf. No. of folia 97. (15.1"+1.2")

Character Oriya, Condition worm eaten on both the sides. Complete. Date of copy is not given. Find spot— Tulasipur, P.S. Nimapada, Dt. Puri.

Topics—इति श्री वापीदास बडपण्डा महापात्रकृते सदाचार विवेके सूर्य्योदयात् पूर्व जयप्रकरणम् । सदाचार विवेके प्रथमघटिकाद्वय प्रकरणम् द्वितीय घटिकाद्वय कृत्य प्रकरणम् तृतीय घटिकाद्वय प्रकरणम्, चतुर्थघटिकाद्वय प्रकरणम् । अहोरात्रविहित नित्य-कृत्य प्रकरणम् मन्त्रव्याख्या प्रकरणम् ।

No Colophon.

199

B. S. 21

सन्तान गोपालपूजा

Substance— Country made paper. No of folia 9 (11.1"×4.2") Character- Bengali. Condition good. Date of copy is not given, Incomplete, Find-spot- Kujanga area, Dt. Cuttack.

No Colophon.

200

Dh.91(a).

सर्वतोमुख पद्धतिः

Substance— Palm leaf, No of folia 11 (15 6"×1.3") Character Oriya, Date of copy is not given, Condition good, Complete, Find spot Ranapur area, Dt. Puri.

Beginning— श्रीगणेशाय नमः

अथ सर्वतोमुखस्य वेदसूत्र भाष्याणि लिख्यन्ते ।

End — इत्यग्निचिता सर्वतोमुखपद्धतिः समाप्ता ।

No colophon.

201

Dh.219

स्वर्णाद्रि महोदयः

Substance—Palm leaf, No of folia 129 (12.2" × 1.2") Character—Oriya, Condition—good. Complete. Date of copy is not given Find-spot— Bhubaneswar. Dt. Puri

Beginning— श्री गणेशाय नमः, अविघ्नमस्तु ।

After of मङ्गलाचरण verses

वेदव्यास श्रियोवासः सर्वज्ञ अपराजित ।
एकाम्रकस्य माहात्म्यं वक्तुमर्हस्यशेषतः ।

End—इति श्री स्वर्णाद्रि महोदये क्षेत्रप्रमाण माहात्म्य कथनं नाम त्रिंशोऽध्यायः ।

No colophon.

N.B:- This work is already published is Oriya and Devanagiri characters.

202

Dh. 192

स्मार्त्तरत्नावली

Substance— Palm leaf. No of folia 13 (14." × 1.2") Character—Oriya. Date of copy is not given. Complete. Condition – bad, worm-eaten. Scripts are illegible, Find spot—Bhubaneswar, Dt. Puri

Beginning— ॐ नमो यज्ञपुरुषाय

प्रणम्य श्री महादेवपादपङ्करुहद्वयम्
लिखामि शास्त्रसम्मत्या स्मार्त्तरत्नावलीं शुभाम् ॥

End— इति स्मार्त्तरत्नावल्यां मन्त्रकर्म समाप्तम्

Topics — पात्रघटना, कुण्डघटना, अन्याधानानुकूल, प्रथमावसथ्याधाने नान्दीमुखश्राद्ध, प्रथमावसथ्यधानेपुन राधाधन, मणिकाधानविधि, पञ्चमहायज्ञ, स्मार्त्तप्रायश्चित्तानि, अनादेशप्रायश्चित्तहोम, प्रातः होमविधि, पिण्डपितृयज्ञ, पक्षादिकर्म, प्रवासप्रवेशविधि, प्रवेशधर्म, नवान्नभक्षण विधि, मन्त्रकर्म।

No colophon.

203

Dh. 26 **सूरिसर्वस्वम्** (प्रथमखण्ड)

By गोविन्द कविभूषण सामन्तराय

Substance—Palm leaf, No of folia 97 (11.2" × 1.3") Character—Oriya, Date of copy is not given, Condition—good, Complete, Find spot— Ranapur area, Dt. Puri.

Beginning— श्री गणेशाय नमः

ब्रह्मेन्द्रलक्ष्मी नवनव्यधामा सत्सच्चिदानन्द पवित्रनामा।
व्यक्तिर्जगत्क्वाचिदशेषसेव्या निर्व्याजमव्याहतशक्तिरव्यात्॥

यत्पादपाथोजरजोऽभिषिक्तः सर्वाशुभं हन्ति जनो जगत्याम्
प्राप्नोति चानन्दमयं पुमांसं नमीश्वरं श्रीगुरुदेवमीडे।

आसीत् श्री विश्वनाथः प्रवरतरभरद्वाज वंशावतंसः।

× × ×

श्रीमान सामन्तरायेत्यधिपदपदवी मास्थितः ख्यातकीर्त्तिः।

तदात्मजन्मा किल रामशर्म्मा प्रीत्यै हरेस्त्यक्त समस्तकर्मा।
गृहाश्रमस्थोऽपि महाविरक्तः सतां मतः संसदि कृष्णभक्तः॥
तत्पुत्रोऽखिलगद्यपद्यरचना चातुर्य चिन्तामणिः
शान्तात्मागमशास्त्रतत्त्वविदुषां संसत् सदा चाग्रणीः।

भूभृद्भूसुर सज्जनेषु सुहृदां प्रेमप्रमोदास्पद
गोविन्दः कविभूषणो विजयते सामन्तरायोत्तर: ।

ग्रन्थास्तेनारभ्यते मत्प्रयत्नेनः-
सन्तोषार्थं सूरिसर्वस्वनामा ।
सर्वार्थानां साधने साधकानां
साक्षात्क्ष्मायां कल्पवृक्षानुकल्पः ।

End—इति श्री गोविन्द कविभूषण सामन्तराय विरचिते सूरिसर्वस्वे गुरुशिष्यादि-क्रियाकथनं नाम एकादशः संग्रहः ।

Topics— ग्रन्थमुख निबन्धानुदिन दीक्षास्वरूप कथनं नाम प्रथमः संग्रहः । दीक्षाङ्गभूत मण्डपादि स्वरूप निरूपणं नाम द्वितीयः संग्रहः । कुण्डादिनिरूपणं नाम तृतीयः-संग्रहः । कालशुद्ध्यादि मन्त्रानुकूल्य कथनं नाम चतुर्थः संग्रहः । चक्रसिद्धि निरूपणं नाम पञ्चमः संग्रहः । दीक्षाङ्गसमुद्देशो नाम षष्ठः संग्रहः । मण्डलविभागो नाम सप्तमः संग्रहः । कलशार्च्चनविधिर्नामाष्टमः संग्रहः । वह्निजनन विधिर्नाम नवमः संग्रहः । होमविधिर्नाम दशमः संग्रहः । मन्त्रदीक्षा विधिर्नाम एकादशः संग्रहः ।

Colophon – लेखकेनास्ति दोषः ।
ए पुस्तक लिकेड चन्द्रशेखरपुर रहणि महाजनमानमिश्रङ्कर । शुभमस्तु

204

Dh 27.

सूरिसर्वस्वम्

By गोविन्दकविभूषण सामन्तराय

Substance— Palm leaf. No of folia 201. (14.5" × 1.5") Charecter—

The following topics are found in chapters 12th to 21st of the 1st part of 'Sūri Sarvasva' printed by the Asiatic Society of Bengal in 1912.
पुरश्चरणनिर्द्देशोनाम द्वादशः संग्रहः । मालानिर्णयो नाम त्रयोदशः संग्रहः । जपादिपंचाग-विनिर्णयो नाम चतुर्दशः संग्रहः, मन्त्रसिद्ध्युपाय पुरश्चरण विधिर्नाम पंचदशः संग्रहः । निशान्तकृत्य नाम षोडशः संग्रहः, प्रातःकृत्य नाम सप्तदशः संग्रहः, निशान्तकृत्य नाम अष्टादशः संग्रहः, पूजनाङ्ग व्यवस्था निरूपणं नाम ऊनविंशतिः संग्रहः, प्रातःकृत्ये सन्ध्यार्च्चन विधिर्नाम विंशः संग्रहः, सर्वगृहमोक्षणं नाम एकविंशः संग्रहः ।

Oriya, Date of copy is not given. Condition— good. Complete, Find spot—Ranapur area, Dt. Puri.

Beginning— राजोपचारे रथ ये नियुक्ता-
स्तौर्य्यत्रिकाद्यैः कृतिनश्च ये स्युः ।
ये स्तावका भक्तजनाश्च विष्णो-
स्तांस्तान्नियोज्यागत एव तत्र ॥

End— आसीत् भरद्वाजकुल प्रसूतो द्विजोत्तमः कश्चन दुर्गदासः ।
यदीयसम्बन्धमवाप्य विप्रा इहोत्कले श्लाघ्यतमा बभूवुः ॥
स च स्वनाम्नाकृत शासनैकं संस्थाप्य बन्धूनिह सोऽपि तस्थौ ।
देवर्षिपूर्वानिवतिस्म यज्ञस्वाध्यायसन्तानवितानयोगात् ॥

तस्यात्मजोऽभूत किल विश्वनाथो भक्त्या च यस्तोषितविश्वनाथः ।
संप्राप्य भूपात् कविचन्द्रसंज्ञां सम्मानितोऽभूत् कवि पण्डितानाम् ॥
काले प्रविष्टं नृपमानसिंहं पाश्चात्यभूपैः सह वर्त्तमानम् ।
अतोषयत् काव्यरसोपहारैर्हारैरिवात्युज्जलरत्नसारैः ॥

नीत्वा सहामुं स नृपः स्वदेशं सम्मेलयामास च पतिशाहा ।
प्राज्ञः कवीन्द्रः परिचायितोऽसौ कालं कियन्त च निनाय तत्र ।
ततो धनै भूमि विभूषणाद्यैः स सत्कृतो हास्तिन पतिशाहा ।
स्वदेशमागात् प्रथितप्रतिष्ठस्तिष्ठन्ति यत्र स्वजनास्स सर्वे ॥

कृतालयश्चालपुरेऽथ काश्चित् समाः समास्थाय सुखं स्वगेहे ।
दैवान्मृतायां निजधर्म पत्न्यां पुनः परां कांचिन्थोदुवाह ।
जातेऽथ तस्यां तनयद्वयेऽसौ पूर्वात्मजानामनुमाय तेषां ।
सापत्न्यबुद्ध्याऽपरितोषमीर्ष्यां समर्पयामास गृहं च तेभ्यः ॥

स्वयं पृथक् भूय सहात्मजाभ्यां पत्न्या च तत्राप्यभिनन्द्मानः
प्रतापपूर्वं किल रामचन्द्रपुरं पुरा शासनमध्युवास ।
सम्बन्धिभिस्तत्र निवासिविप्रैः सुसत्कृतोऽसौ कविचन्द्रनामा ।
कियत्समान्ते समवाप मुक्तिं योगेन हित्वा किल भौतिकं सः ।

तदीयदेहेन सहास्य पत्नी प्रविश्य वाह्नं स्ववपुर्विहाय ।
जगाम सालोक्यमथ स्वभर्त्तुः संत्यज्य पुत्रा वुपनीतमात्रौ ॥
तौ चाथ पुत्रावपनीत शोकौ स्वबन्धुभिः प्रेतकृतिं स्वपित्रोः ।
समाप्य दिग्देश विवेक शून्यावाश्वासितौ बन्धुभिरूचतुश्च ॥

कालेऽथ तस्मिन्नृपतेरमात्यः श्रीदास विद्याधर नामकोऽभूत् ।
तौ बालकौ कालवशादुपेत्य विज्ञाप्य गोत्रं श्रयतेस्मचामुम् ॥
पितुः समज्ञा मनुशीलयन् स श्री मन्त्रिराज स्तदुभौ ररक्ष ।
तदाश्रयाद्भूरि समृद्धिभाजौ सुखेन तौ तस्थतुरल्पकालम् ॥

ततो महादेव महेश्वराभिधाववाप्तविद्यौ धृतयौवनावुभौ ।
यदा निजोद्वाह समुद्यतौ मुदा बभूवतुः क्षोभमवापतुस्तदा ॥
जघान राजा कपटेन मन्त्रिणं तं दासविद्याधरमज्ञशिक्षया
तदीयपत्नी भयशोक विह्वलामुभावुपादाय परिच्छदैः सह ॥

ततोऽस्य जामातु रुपेत्य निर्वृतं समर्थ्य तां वक्रमहीपतेश्च तौ ।
निवेदयामासतु रार्तिवत्तदा तदीयभर्तु र्विपदं यथाश्रुताम् ॥
स वक्रदुर्गाधिपतिश्च सादरं ररक्ष तां मातरमात्मयोषितः ॥
अथोड्रदेशे तदनन्तरं महानुपप्लवोऽजायत लोकदुःसहः ॥

ततः प्रभृत्येव सुखं सहोदरौ समूषतुस्तत्र च वक्र भूभुजा ।
अवाप्य वृत्तिं कविचन्द्र पुत्रकावमात्य पत्न्यापि तथा समर्चितौ ॥
गते कियत्येवमनेहसि स्वयं स्वतुल्यसम्बन्धिकुलं मलभ्य तौ ।
विवाहकृत्ये विधुरौ बभूवतुः समृद्धिमाप्तामपि नो ननन्दतुः ॥

ततस्तयोरग्रज एकएव सहोदरं तत्र विहाय निर्गतः ।
विलोक्य सोपद्रवमुड्रनीवृतं निवृत्तधीर्वाणपुरान्तरं ययौ ॥
अथो कनीयानिह वक्रदुर्गपप्रसादलब्धाशय एव तस्थिवान् ।
तदीयदेशस्थितविप्र कन्यका मतुल्यकुल्यामपि पाणिनाग्रहीत् ॥

महेश्वराख्यस्य च तस्य वंशजा बभूवुरार्य्या बहवो हि ये पुरा ।
तदन्वये कोऽपि कनिष्ठवंशकृत् बभूव भूदेववरः त्रिलोचनः ॥
तदात्मजः कृष्णसमाख्ययाभवत्स पद्मनाभस्तनयस्ततोऽभवत् ।
तदात्मजो दाशरथि र्बभूव यः सामन्तरायोत्तरनामतः श्रुतः ॥

श्री विश्वनाथस्तनयोऽस्य चाभूत्सामन्तरायं पदमाप्तवान् यः ।
प्रापात्मजं भाग्यवशेन रामचन्द्रं बृहत् पण्डितनामधेयम् ॥
तदात्मजोऽहं महतामनुग्रहात् विचार्य्य शास्त्र स्मृति तन्त्रस हिताः ।
चकार यद्यत् सदसत्तदस्तु वा सतां मुदे स्तात्तृषिते जलं यथा ॥

नमः खलेभ्यस्तु महाबलेभ्यः दोषोदये मित्रपुरोदधद्भ्यः ।
न जातु मत् काव्यकथाप्रसङ्गे भूयादमीषां श्रवणावधानम् ।

End—इति श्री गोविन्दकविभूषणसामन्तराय विरचिते सूरिसर्वस्वे शेषसंग्रहो नाम चत्वारिंशः संग्रहः ।

समाप्तोऽयं ग्रन्थः ।

Topics— प्रातकृत्ये सर्वोरवार निर्णयो नाम द्वाविंशः संग्रहः, प्रातः कृत्ये पूजा-मुख्याङ्ग भूतशुद्धि निरूपणनाम त्रयोविंशः संग्रहः, पूजाङ्गनिरूपणे षट्चक्रान्त निरूपणनाम-चतुर्विंशः संग्रहः, प्रातः कृत्याच्चन मनुषङ्गिमातृकाविधिः नाम पञ्चविंशः संग्रहः, मातृकाभेद निरूपणं नाम षड्विंशः संग्रहः । प्रातःकालपूजानुषङ्ग भावचतुष्टय पर्य्यन्त-न्यास प्रपञ्चोनाम सप्तविंशः संग्रहः, प्रातःपूजादिषु मन्त्रनिर्द्देशो नामाष्टाविंशः संग्रहः, ध्याननिर्द्देशो नाम ऊनत्रिंशः संग्रहः, अन्तर्यजन विधिर्नाम त्रिंशः संग्रहः, बह्यपूजाया-मावाहनादि विधिर्नामैक त्रिंशतमः संग्रहः, पुष्पप्रदान विधिर्नाम द्वात्रिंशः संग्रहः, नैवेद्य-दानादि विधिर्नाम त्रयस्त्रिंशः संग्रहः, तर्पणविधिर्नाम चतुस्त्रिंशः संग्रहः, मध्याह्नपूजा विधि नाम पञ्चत्रिंशः संग्रहः, रात्रिपूजाविधि नाम षट्त्रिंशः संग्रहः, भगवन्नैमित्तिक परिचर्य्याविधि नाम सप्तत्रिंशः संग्रहः, मानसीय भगवदाराधनविधि नामाष्टत्रिंशः संग्रहः, शेषरहस्य प्रकाशननाम एकोनचत्वारिंशः संग्रहः, शेषसंग्रहोनाम चत्वारिंशः संग्रहः ।

No colophon

205

Dh. 82.

सूरिसर्वस्वम्

By गोविन्द कविभूषण सामन्तराय

Substence—Palm leaf, No of folia 145 (16.2"×1.2") Character Oriya, Date of copy 1786-87, A.D. Complete. Condition—not good, Find spot-not known.

Colophon— वीरकेशरिमतङ्गजराज प्रोद्यतेत्र गधिक षष्टितमेऽङ्के
मत्कृतं लिखितमत्र मयासीत्तन्त्रमेतदनुशीलयतार्य्याः ।

समाप्तोऽयं ग्रन्थः, Similar to No 187

206

Dh 96. (a) **स्मृतिसरोज कलिका**

By विष्णु शर्म्म

Substance— Palm leaf. No of folia 142 (13.1″×1.2″) Character—Oriya, Date of copy is not given, Condition-good, Incomplete, Find spot Ranapur area, Dt. Puri.

Beginning— श्री रामचन्द्राय नमः, ॐ गणेशाय नमः, अविघ्नमस्तु

नत्वा विष्णुं गणेशञ्च गोभिलादीनृषींस्तथा।
क्रियते नित्यकृत्येषु छन्दोगयानां च पद्धतिः।

Authorities quoted—

भाषिता विष्णुशर्म्मेण प्रयत्नेन स्फुटीकृता
सरोज-कलिकानाम्ना स्मृतिस्नानादि कर्म्मणा ॥
मनुना याज्ञवल्क्येन विश्वामित्रेण चात्रिणा
विष्णुना च वशिष्ठेन व्यासेनोशनसा तथा ॥

बोधायनेन दक्षेण शङ्खेनाङ्गिरसा तथा।
आपस्तम्बेनागस्त्येन हारीतगुरुनारदैः ॥
पराशरेण गार्ग्येण गौतमेन यमेन च
शातातपेन लिखिते सम्बर्त्तेन तथैव च।

गोभिलेन सुमन्तेन मनुस्वायम्भुवेन च ॥
अष्टाविंशतिभिर्जुष्टं शास्त्रं लोकहितैरपि।

End— सरोजकलिकाग्रन्थः स्मृतिमुत्यष्टकं शुभम्।
नाना स्मृतिं समालोक्य क्रियते विष्णुशर्म्मणा ॥

इति विष्णुशर्म्मकृतौ स्मृतिसरोज कलिकायां पञ्चगव्यादि प्रायश्चित्ताष्टमखण्डप्रकरणं सम्पूर्णम्

No colophon.

207

Dh.198

स्मृति चान्द्रिका

With Oriya prose translation.

Substance—Palm leaf, No of folia 43 (12.7″ × 1.3″) Character—Oriya, Date of copy is not given, Condition—not good, Complete. Find spot—Parlakhemundi, Dt. Ganjam

Beginning— श्री शिवदुर्गा शरणम्

अथ स्मृतिशास्त्रोक्त सूक्ष्मभाषा लिख्यते ।

End— इति स्मृतिचन्द्रिका समाप्ता ।

Topics-अशोकाष्टमी, रामनवमी, नृसिंहजन्म, चैत्रमासकृत्य, वैशाखमासकृत्य. ज्येष्ठमास कृत्य, शीतलषष्ठी, देवस्नान, श्रीगुण्डिचा, श्रावणीपूर्णिमा, बलदेव पूजाकालनिर्णय । रक्षा-पञ्चमी, जन्माष्टमी, गौरीव्रत, विघ्नराजव्रत विधि, कुक्कुटीव्रत विधि, वामनजन्म, मूला-ष्टमी, महालयानिर्णय, अपराजिताविधि. दीपावली, कार्त्तिकपौर्णमासीनिरूपण, प्रथमाष्टमी वसन्तपञ्चमी, भीष्माष्टमी, माघत्रयोदशी, शिवरात्रि, दोलयात्रा, शुद्धिनिरूपण, जन्माशौच विधि, बालाशौच, प्रोषितस्य मरणनिर्णय, सपिण्डीकरण विधि, तर्पण निर्णय, श्राद्धवैश्व-देवयोः कालनिर्णय, शस्त्रघातिनां मरणनिर्णय, अमावास्या निर्णय, एकोद्दिष्ट काल निर्णय, पार्वणश्राद्ध निर्णय, बालकपिण्डमाह, अद्‌र्ध्वपथ, मातृपिण्डमाह, सहगमनश्राद्धविधि, अपरपक्षे पितृश्राद्धविधि, प्रवास निर्णय ।

तिथि निरूपण, तिथिविचार, मासनिरूपण, ऋतुनिर्णय, अयननिर्णय, सम्वत्सर निर्णय ।

No colophon.

208

Dh. 199.

स्मृतिसंग्रहः or दिव्यसिंह कारिका

By दिव्यसिंह सुधी

Substance—Palm leaf, No of folia 133 (13.3″ × 1.5″) Character-

Oriya, Date of copy is not given, Condition not so good, Incomplete, Find spot— Bhubaneswar, Dt. Puri.

Beginning— श्री गणेशाय नमः

वात्सान्वयसमुत्पन्नो दिव्यसिंहाभिधः सुधीः
एकत्र स्मृतिवाक्यानि संगृथ्येव लिखाम्यहम् ?।

No colophon.

209

Dh. 13. स्मृतिसार संग्रहः

By विश्वनाथ मिश्र

Substance—Palm leaf. No of folia 82 (16.1″×1.8″) Character—Oriya, Date of copy is about 1725 A.D. Condition—good, Complete Find-spot—not known.

Beginning— श्री गणेशाय नमः

मन्वादिशास्त्राणि गुरोरधीत्य
सम्यक् तथाशास्त्रमतं प्रतीत्य ।
दृष्ट्वा च शिष्टाचरणं करोमि
